**षष्ठः पाठः**

# क्रियाकारक-कुतूहलम्

**(संकलित)**

*[किसी भी भाषा का सही ज्ञान उसके व्याकरण को समझने से होता है। संस्कृत का व्याकरण सभी भाषाओं के व्याकरण से कठिन है। कोई भी वाक्य बिना कारक और क्रिया के नहीं बोला जा सकता अर्थात् कारक और क्रिया के सम्बन्ध से ही वाक्य का निर्माण होता है। कारक और लकार को ध्यान में रखकर प्रस्तुत पाठ का संकलन किया गया है। प्रारम्भ के सात श्लोक कारक के विषय में तथा पाँच श्लोक लकार के विषय में बताते हैं। सभी श्लोक अलग-अलग ग्रन्थों से संकलित किये गये हैं।]*

**(विभक्ति-परिचयः)**

**उद्यमः साहसं धैर्यं, बुद्धिः शक्तिः पराक्रमः।**
**षडेते यत्र वर्तन्ते, तत्र देवः सहायकृत्।।१।।** (प्रथमा)

**विनयो वंशमाख्याति, देशमाख्याति भाषितम् ।**
**सम्भ्रमः स्नेहमाख्याति, वपुराख्याति भोजनम्।।२।।** (द्वितीया)

**मृगाः मृगैः संगमनुव्रजन्ति,**
**गावश्च गोभिस्तुरगास्तुरङ्गैः।**
**मूर्खाश्च मूर्खैः सुधियः सुधीभिः**
**समानशील-व्यसनेषु सख्यम्।।३।।** (तृतीया)

**विद्या विवादाय धनं मदाय, शक्तिः परेषां परिपीडनाय।**
**खलस्य साधोर्विपरीतमेतद्, ज्ञानाय, दानाय च रक्षणाय।।४।।** (चतुर्थी)

**क्रोधात् भवति संमोहः, संमोहात् स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति।।५।।** (पञ्चमी)

**अलसस्य कुतो विद्या, अविद्यस्य कुतो धनम्।**
**अधनस्य कुतो मित्रम्, अमित्रस्य कुतः सुखम्।।६।।** (षष्ठी)

**शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे।**
**साधवो न हि सर्वत्र, चन्दनं न वने वने।।७।।** (सप्तमी)

**(लकार-परिचयः)**

**पापान्निवारयति योजयते हिताय**
**गुह्यं निगूहति गुणान् प्रकटीकरोति।**
**आपद्गतं च न जहाति ददाति काले,**
**सन्मित्र-लक्षणमिदं प्रवदन्ति सन्तः।।१।।** (लट्)

**निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु**
**लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु युगान्तरे वा**
**न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।।२।।** (लोट्)

**अपठद् योऽखिला विद्याः, कलाः सर्वा अशिक्षतः।**
**अजानात् सकलं वेद्यं, स वै योग्यतमो नरः।।३।।** (लङ्)

**दृष्टिपूतं न्यसेत् पादं, वस्त्रपूतं जलं पिबेत्।**
**सत्यपूतां वदेद् वाचं, मनःपूतं समाचरेत्।।४।।** (विधिलिङ्)

**रात्रिर्गमिष्यति भविष्यति सुप्रभातम्**
**भास्वानुदेष्यति हसिष्यति पंकजश्रीः।**
**इत्थं विचिन्तयति कोशगते द्विरेफे**
**हा हन्त ! हन्त ! नलिनीं गज उज्जहार।।५।।** (लृट्)

# अभ्यास-प्रश्न

१. निम्नलिखित श्लोकों की हिन्दी में ससन्दर्भ व्याख्या कीजिए—

(क) मृगाः मृगैः संगमनुव्रजन्ति, गावश्च गोभिस्तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशील-व्यसनेषु सख्यम्।।

(ख) विद्या विवादाय धनं मदाय, शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतद्, ज्ञानाय, दानाय च रक्षणाय।।

(ग) पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले, सन्मित्र-लक्षणमिदं प्रवदन्ति सन्तः।।

(घ) दृष्टिपूतं न्यसेत् पादं, वस्त्रपूतं जलं पिबेत्।
सत्यपूतां वदेद् वाचं, मनःपूतं समाचरेत्।।

२. निम्नलिखित श्लोकों का संस्कृत में अर्थ लिखिए—

(क) उद्यमः साहसं धैर्यं, बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते, तत्र देवः सहायकृत्।।

(ख) विद्या विवादाय धनं मदाय, शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतद्, ज्ञानाय, दानाय च रक्षणाय।।

(ग) निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।।

(घ) अलसस्य कुतो विद्या, अविद्यस्य कुतो धनम्।
अधनस्य कुतो मित्रम्, अमित्रस्य कुतः सुखम्।।

(ङ) पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले, सन्मित्र-लक्षणमिदं प्रवदन्ति सन्तः।।

३. निम्नांकित सूक्तियों की ससन्दर्भ हिन्दी में व्याख्या कीजिए—

(क) विनयो वंशमाख्याति, देशमाख्याति भाषितम्।

(ख) समानशील-व्यसनेषु सख्यम्।

(ग) सत्यपूतां वदेद् वाचं, मनःपूतं समाचरेत्।

४. धीर पुरुष का क्या लक्षण बताया गया है?

५. अन्तिम श्लोक द्वारा कवि हमें क्या बताना चाहता है?

६. पाठ के उन दो श्लोकों को बताइए जो आपको सबसे अधिक पसन्द आये हों।

## ➡ आन्तरिक मूल्यांकन

१. 'कारक' के चिह्न लिखिए।

२. लकार कितने होते हैं? नामोल्लेख कीजिए।

●●●